**अध्यायः 3**

# भोजनं सङ्ग्रहात् उत्पादनपर्यन्तम्



**नेइनुओ इत्यस्याः भोजनम्**

अद्य नेइनुओ स्वस्य रुचिकरं भोजनं कुर्वती आसीत् – तत्र भोजने सा ओदनं, शीतलपेयं कुष्माण्डं माषाज्यं मांसं च खादति स्म । तस्याः मातामही स्वगृहस्य पृष्ठस्थभागे लघ्वोद्याने एव कुष्माण्डः माषाज्यम् इत्येतानि शाकानि च उत्पादितवती आसीत् । भोजनं कुर्वती नेइनुओ स्वस्याः गतदिनेषु विद्यालयपक्षतः कृतायाः यात्रायाः काले मध्यप्रदेशे भुक्तभोजनस्य स्मरणम् अकरोत् । तत् कियत् उपस्कारितम् आसीत् । परन्तु तत् एतादृशं कस्मात् कारणात् आसीत् ?

## विभिन्नप्रकारकाणि भोजनानि

अद्यत्वे वयं स्वभोजनस्य अधिकांशं भागं प्ररोहितसस्येभ्यः पालितपशुभ्यः च प्राप्नुमः । भिन्नानि सस्यानि प्ररोहितुं भिन्नयोः जलवाय्वोः आवश्यकता भवति यथा धान्यस्य कृष्यर्थं गोधूमयवयोः अपेक्षायाम् अधिकजलस्य आवश्यकता भवति । अतः वयं पश्यामः यत् कृषकाः विशिष्टं सस्यं विशिष्टक्षेत्रेषु एव प्ररोहन्ति । एतद् एव न पशूनां कृते अपि स्वानुकूलं वातावरणस्य आवश्यकता भवति । उदाहरणार्थं वयं द्रष्टुं शक्नुमः यत् शुष्क-पर्वतीय-जलवायुषु पशूनां अपेक्षायाम् अजादयः सहजतया जीवितुं शक्नुवन्ति । परन्तु यथा भवती द्वितीये अध्याये पठितवती स्त्रीपुरुषाः स्वभोजनस्य उत्पादनं सर्वकाले न कृतवन्तः ।

## कृषेः पशुपालनस्य च प्रारम्भः

द्वितीयेऽध्याये अस्माभिः पठितं यत् संसारस्य जलवायू परिवर्तेते । जनाः च येषां वनस्पतीनां पशूनां च भोजनस्य रूपेण प्रयोगं कुर्वन्ति स्म ते अपि परिवर्तिताः । खाद्यवनस्पतयः कुत्र प्राप्तुं शक्यन्ते जनानाम् अवधानम् एतत् तथ्यं प्रति गतम् बीजानि कथं स्वडंठ्ल इत्यस्मात् कथं त्रोटित्वा अधः पतन्ति पतितबीजानाम् स्वकाण्डात् विछिन्नानि भूत्वा अपि च तेभ्यः पादपानां प्ररोहणम् इत्यादिः । अनेन एव प्रकारेण ते पादपानां संरक्षणम् आरब्धवन्तः स्युः । चटकाभ्यः वन्यपशुभ्यः च पादपानां सुरक्षा कृता स्यात् यतः ते समीचीनतया उत्पत्तिं गच्छेयुः तेषां बीजानि सम्यक्तया पक्वानि स्युः । अनेन प्रकारेण ते कालक्रमेण कृषकाः जाताः स्युः ।

अनेन एव प्रकारेण जनाः गृहस्य पार्श्वे पशूनां कृते घासादिखाद्यं स्थापयित्वा लोभपाशे तान् पातयित्वा गृह्यपशून् इति कृतवन्तः स्युः । आदौ यः वन्यपशुः गृह्यपशुः इति कृतः सः कुक्कुरस्य वन्यपूर्वजः आसीत् । शनैः शनैः जनाः अजावि-गो-सूकरसदृशान् पशून् स्वगृहाणां समीपम् आगन्तुम् प्रेरितवन्तः । एतादृशः पशवः समूहेषु निवसन्ति स्म अपि च अधिकतराः घासं खादन्ति स्म । प्रायः जनाः अन्येभ्यः वन्यप्राणिभ्यः तेषां रक्षणं कुर्वन्ति स्म अनेन प्रकारेण ते शनैः शनैः पशुपालकाः जाताः स्युः ।

किं भवती ज्ञापयितुं शक्नोति यत् आदौ कुक्करान् एव गृहपोषितान् किमर्थं कृतवन्तः ?

### वासस्य प्रक्रिया

पादपानां प्ररोहणं पशूनानां च रक्षणं यद् अस्ति जनैः तस्य कृते 'वासस्य प्रक्रिया' (बसने की प्रक्रिया) इति नाम प्रदत्तम् । गृहपोषिताः पादपाः अपि च पशवः प्रायः वन्यपादपेभ्यः जन्तुभ्यः च पृथक् भवन्ति । एतस्य कारणम् अस्ति यत् वासस्य प्रक्रियायाः दिशि गृहीतपादपानां पशूनां च जनाः चयनं कुर्वन्ति । उदाहरणार्थं जनाः तेषां पादपानां पशूनां च एव चयनं कुर्वन्ति येषां रुग्णतायाः सम्भावना न्यूना स्यात् । एतत् एव न, जनाः तेषां पादपानाम् एव चयनं कुर्वन्ति येभ्यः स्थूलबीजयुक्तानि अन्नानि उत्पद्यन्ते सार्धम् एव येषां वृन्तं दृढं स्यात् यः अन्नस्य पक्वबीजानां भारं सोढुं समर्थः स्यात् । एतादृशानां पादपानां बीजानि जागरूकतया स्थाप्यन्ते यतः पुनः प्ररोहितुं तेषां गुणाः सुरक्षिताः तिष्ठेयुः ।



ते एव पशवः अग्रे प्रजननार्थं चीयन्ते ये सामान्यतया अहिंसकाः भवन्ति । अतः वयं पश्यामः यत् पालिताः पशवः कृष्यर्थं गृहीतपादपाः च वन्यपशुभ्यः वन्यपादपेभ्यः च निरन्तरं भिन्नाः उपागताः । उदाहरणार्थं वन्यपशूनां अपेक्षायां पालितपशूनाम् अर्थात् ग्राम्यपशूनां च दन्ताः शृङ्गाः च लघवः भवन्ति ।

एतान् दन्तान् पश्यन्तु । एतेषु कः वन्यसूकरस्य अस्ति अपि च कः ग्राम्यसूकरस्य अथवा पालितसूकरस्य अस्ति ?

वासस्य प्रक्रिया आसंसारं शनैः शनैः अचलत् । इयं प्रायः १२०००वर्षेभ्यः प्राक् प्रारब्धा । वास्तविकतायाम् वर्तमानकाले वयं यद् भोजनं कुर्मः तत् अस्याः वासस्य प्रक्रियायाः कारणात् एव अस्ति । कृष्यर्थं स्वीकृतेषु सर्वप्राचीनसस्येषु गोधूमाः यवाः च आयान्ति तथैव आदौ पालितेषु पशुषु कुक्कुरेभ्यः पश्चात् मेषाः अजाः च सम्मिलिताः सन्ति ।

## काचित् नवीनजीवन-शैली

भवती कस्यचित् पादप-बीजस्य रोपणं कृत्वा पश्यतु, भवती द्रक्ष्यति यत् एतस्य विकसने कश्चित् कालः अपेक्षते । एतेषु कानिचन दिनानि मासाः अथवा वर्षाणि

अन्नस्य उपयोगाः



बीजरूपेण
खाद्यरूपेण
उपहाररूपेण
भण्डारणरूपेण

लगितुं शक्नुवन्ति । अतः यदा जनाः पादपानां प्ररोहणम् आरब्धवन्तः तदा तेषां रक्षणार्थं तैः एकस्मिन् एव स्थाने चिरकालं यावत् वस्तव्यम् इति वरं स्यात् अत्र भवति स्म । बीजवपनाद् आरभ्य सस्यानां पाकं यावत् पादपानां सेचनाय अवाञ्छिततृणानि अपाकर्तुं जन्तुभ्यः चटकाभ्यः च तेषां रक्षार्थं तैः तत्र एव वासः करणीयः भवति स्म । एतादृशानि बहूनि कार्याणि तत्र सम्मिलितानि आसन् । कर्तनस्य पश्चात् अन्नस्य उपयोगः जागरूकतया करणीयः भवति स्म ।

अन्नानां भोजनबीजरूपेण संरक्षणम् आवश्यकम् आसीत् अतः जनाः एतस्य भण्डारणस्य विषये चिन्तितवन्तः । बहुषु क्षेत्रेषु जनाः विशालानि मृन्मयाणि पात्राणि रचितवन्तः कण्डोलाः निर्मिताः अथवा पुनः भूमौ गर्तं कृत्वा तत्र तानि स्थापितवन्तः ।

किं भवती अनुभवति यत् आखेटकाः अथवा भोजनसङ्ग्राहकाः पात्राणि रचयन्ति स्म अपि च तेषां प्रयोगं कुर्वन्ति स्म ? स्वोत्तरस्य कारणं ज्ञापयतु ।

### पशवः : चलखाद्यभाण्डागाराः

पशवः प्रजननं कुर्वन्ति यस्मात् तेषां सङ्ख्या वर्धते । यदि पशूनां संरक्षणं भवेत् तर्हि तेषां सङ्ख्या तु वर्धते एव सार्धम् एव तेभ्यः दुग्धम् अपि प्राप्तुं शक्यते यत् भोजनस्य किमपि अस्ति । एतद् एव न पशुभ्यः अस्मभ्यं मांसम् अपि लभते । अपरेषु शब्देषु पशुपालनं भोजन-भण्डारणस्य कश्चित् उपायः अस्ति ।

भोजनम् अतिरिच्य पशुभ्यः किं किं लब्धुं शक्यते ?
अद्य पशूनाम् उपयोगः किमर्थं भवति ?

### आगच्छतु, आरम्भिकपशुपालकानां कृषकाणां च विषये जानीमः ?

द्वितीयं मानचित्रं (पृष्ठसङ्ख्या-१४) पश्यतु । किं भवती तत्र बहून् नीलवर्णान् पश्यति ? जानाति, एतेषु प्रत्येकं तत् स्थानं दर्शयति, यत्र पुरातत्त्वविदः प्रारम्भिककृषकाणां पशुपालकानां च भवनस्य साक्ष्याणि च प्राप्तवन्तः सन्ति । एतानि सम्पूर्णे उपमहाद्वीपे प्राप्तानि सन्ति । एतेषु सर्वथा महत्त्वपूर्णानि साक्ष्याणि पश्चिमोत्तरक्षेत्रे काश्मीरे पूर्वीदक्षिणभारते प्राप्तानि सन्ति ।

वास्तविकतायां एतानि निर्दिष्टस्थानानि कृषकाणां पशुपालकानां च निवासाः आसन् अथवा न आसन् एतस्य निरीक्षणाय वैज्ञानिकाः खनने प्राप्तानां पादपानां पशूनां च अस्थ्नाम् अवशेषान् स्वीकृत्य तेषाम् अध्ययनं कुर्वन्ति । एतेषु सर्वथा रोचकानि ज्वलितान्नस्य बीजानां च अवशेषाः सन्ति । इत्थं प्रतिभाति यत् एते प्रमादात् अथवा ज्ञात्वा ज्वलितानि स्युः । वैज्ञानिकाः एतेषाम् अन्नानां परिचयं प्राप्तुं शक्नुवन्ति ।

अनेन प्रकारेण वयं जानीमः यत् एतस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु बहूनि सस्यानि उत्पादितानि स्युः। वैज्ञानिकाः विभिन्नानां पशूनां अस्थ्नाम् अपि ज्ञानं प्राप्तुं शक्नुवन्ति।
अधोलिखिततालिकातः भवती इदं ज्ञातुं शक्नोति यत् कुत्र कुत्र अन्नानां पालितपशूनां च अवशेषाः लब्धाः सन्ति।

| अन्नानि अस्थीनि च | पुरास्थलानि |
|---|---|
| गोधूम-यव-अजा-अवि-पशवः | मेहरगढम्(आधुनिक-पाकिस्तानम्) |
| तण्डुलाः पशूनाम् अस्थ्नां खण्डाः | कोल्डिहवा (आधुनिकोत्तरप्रदेशः) |
| तण्डुलाः,पशवः (मृत्तिकायां खुराणां चिह्नानि) | महागढा (आधुनिकोत्तरप्रदेशः) |
| गोधूमाः द्विदलानि च | गुफकालः (आधुनिक-काश्मीरम्) |
| गोधूमाः द्विदलानि कुक्कुराः पशवः महिषः अजा अविः | बुर्जहोमः (आधुनिक-काश्मीरम्) |
| गोधूमः हरितचणकाः यवाः महिषी वृषभः | चिरांदः (आधुनिक-बिहारः) |
| प्रियङ्गुः पशवः अजः अविः सूकरः | हल्लूरः (आधुनिक-आन्ध्रप्रदेशः) |
| कृष्णचणकाः प्रियङ्गवः पशवः अवयः सूकराः | पैय्यमपल्ली (आधुनिक-आन्ध्रप्रदेशः) |
| येषु स्थानेषु अन्नस्य अस्थ्नां च अवशेषाः प्राप्ताः सन्ति, एतानि तेषु केवलं कानिचन एव सन्ति। | |

## स्थायिजीवनं प्रति

पुरातत्त्वविदः केषुचित् पुरास्थलेषु पर्णकुटीराणां गृहाणां च चिह्नानि प्राप्तवन्तः सन्ति। यथा बुर्जहोमे (वर्तमानकाश्मीरे) जनाः गर्तस्य अधः गृहाणि निर्मान्ति स्म। ये गर्तवासाः इति उच्यन्तेव। एतेषु अधः अवतर्तुं सोपानानि भवन्ति स्म। यतः ते शैत्यकालेषु सुरक्षिताः भवन्ति स्म। पुरातत्त्वविदः पर्णकुटीराणाम् अन्तः बहिः च अग्निप्रज्वालनस्य स्थानं प्राप्तवन्तः सन्ति। इत्थं प्रतिभाति यत् जनाः वातावरणस्य अनुसारं गृहस्य अन्तः बहिश्च भोजनं पचन्ति स्म।

कस्यचित् गर्तवासस्य चित्रं रचयतु।

बहुभ्यः स्थानेभ्यः पाषाणमयानि उपकरणानि अपि प्राप्तानि सन्ति। एतेषु कानिचन एतादृशानि सन्ति यानि पुरापाषाणयौगिक उपकरणैः भिन्नानि सन्ति।

अतः तानि नवपाषाणयुगस्य मन्यन्ते । एतेषु तानि उपकरणानि अपि सन्ति येषां तीक्ष्णतायै तेषु वर्णलेपः क्रियते स्म । उलूखलस्य मुसलस्य च प्रयोगः अन्नेभ्यः वनस्पतिभ्यः च प्राप्तानि अन्यानि वस्तूनि पेष्टुं क्रियते स्म । अद्य सहस्राधिकवर्षाणाम् पश्चात् अपि उलूखलस्य मुसलस्य च प्रयोगः अन्नं पेष्टुं क्रियते । तथैव प्राचीन-



नवपाषाणयुगस्य कानिचन उपकरणानि । एतेषां तोलनां त्रयोदश पृष्ठे द्वितीये अध्याये दर्शितोपकरणैः सह करोतु । भवती एतेषु काः समानताः काः विभिन्नताः च पश्यति ?

स्तरयुगकालिकानाम् उपकरणानाम् निर्माणः प्रयोगः च निरन्तरं भवति । कानिचन उपकरणानि अस्थिभिः अपि निर्मीयन्ते स्म ।

नवपाषाणयुगस्य पुरास्थलेभ्यः बहुविधानि मृण्मयपात्राणि अलभन्त । कदाचित् एतेषु अलङ्करणम् अपि क्रियते स्म । पात्राणाम् उपयोगः वस्तूनि स्थापयितुं क्रियते स्म । शनैः शनैः जनाः पात्राणां प्रयोगं भोजनं पक्तुं अपि आरब्धवन्तः । तण्डुल-गोधूम-द्विदलसदृशानि अन्नानि अधुना आहारस्य महत्त्वपूर्णभागभूतानि जातानि आसन् । जनाः अधुना वस्त्रस्य वयनम् अपि आरब्धवन्तः आसन् । एतन्निमितं कार्पाससदृशानां पादपानाम् प्ररोहणम् अपि कर्तुं शक्यते स्म ।



किं भवती कल्पनां कर्तुं शक्नोति यत् एतस्मिन् पात्रे किं स्थापितं स्यात् ?

किम् एतानि परिवर्तनानि प्रत्येकं स्थाने सहैव जातानि स्युः ? इत्थं नास्ति । एकतः यत्र बहुषु स्थानेषु स्त्रीपुरुषाः आखेटं भोजनसङ्ग्रहणस्य च कार्यं कर्तुम् आरब्धवन्तः आसन् तत्र एव अन्ये जनाः सहस्रं वर्षेषु शनैः शनैः पशुपालनम् अङ्गीकृतवन्तः । अनेकेषु स्थानेषु जनाः ऋत्वनुसारं परिवर्त्य स्वाजीविकाः चालयन्ति स्म ।

### अन्याः परम्पराः

पुरातत्त्वविदः बहु स्पष्टतया एतस्मिन् विषये न किमपि वक्तुं शक्नुवन्ति । विद्वान्सः एतादृशानां कृषकाणाम् अध्ययनं कृतवन्तः । एतेषु प्रायः कृषकाः पशुपालकाः च समूहेषु निवसन्ति सा एव जनजातिः कथ्यते । विद्वान्सः अनुभूतवन्तः यत् एते जनाः काश्चन एतादृशीः परम्पराः मन्यन्ते स्म याः सम्भवतः पूर्वतः एव प्रचलिताः सन्ति ।

## जनजातिः

प्रायः जनजातीयाः जनाः लघुनिवासेषु निवसन्ति । अधिकतराः परिवाराः परस्परं सम्बन्धिताः भवन्ति अपि च एतादृशानां परिवाराणां समूहाः सम्भूय जनजातेः निर्माणं कुर्वन्ति ।

जनजातेः सदस्याः आखेट-भोजनसङ्ग्रह-कृषि-पशुपालन-मत्स्यग्रहणसदृशान् व्यवसायान् कुर्वन्ति । प्रायः महिलाः कृषेः सम्पूर्णं कार्यं कुर्वन्ति । एतेषु भूमिं सज्जीकृत्य बीजवपनात् पादपरक्षणात् च आरभ्य सस्यकर्तनं यावत् कार्यं सम्मिलितम् अस्ति । बालाः पादपानां संरक्षणं कुर्वन्ति अपि च चटकान् पशून् दूरं पलाययन्ते यतः ते पादपानां सस्यानां च हानिं न कुर्युः । महिलाः सस्यस्य वपनं कृत्वा अन्नस्य पेषणं कुट्टनं च कुर्वन्ति । सामान्यतः पुरुषाः पशूनां महान्तं समूहं चारयन्ति अपरञ्च बालाः लघुसमूहान् चारयन्ति । अत्र पशूनां स्वच्छतां दुग्धनिष्कासनं अर्थात् दोहनं स्त्रीपुरुषाः मिलित्वा कुर्वन्ति । तथैव द्वौ मिलित्वा पात्रनिर्माणस्य कण्डोलनिर्माणस्य उपकरणनिर्माणस्य पर्णकुटीराणां निर्माणस्य च कार्यं कुर्वन्ति । गानं नृत्यं गृहसज्जाकार्यम् अपि तेषां जीवनस्य कश्चित् महत्त्वपूर्णः भागः अस्ति ।

- केचन जनाः नेतारः इति मन्यन्ते । ते अनुभवि-वृद्ध-जनाः, युव-योद्धारः, अथवा पुरोहिताः भवितुं शक्नुवन्ति । वयस्कमहिलानां कृते अपि तासां ज्ञानाय अनुभवाय च विशिष्टसम्मानं दीयते ।
- जनजातीयानां सांस्कृतिक-परम्पराः बहु समृद्धाः विशिष्टाः च भवन्ति । एतासु तेषां भाषाः, सङ्गीतं कथाः चित्रकला अपि सम्मिलिताः सन्ति । तेषां स्वकीयाः देवताः भवन्ति ।
  - भूमि-जंगल-घासक्षेत्राणि अपि च जलं कुटुम्बस्य सम्पत्तिः मन्यते येषाम् उपयोगः सर्वे सहैव कुर्वन्ति । एतेषु निर्धनधनिकयोः मध्ये कश्चित् विशिष्टम् अन्तरं न भवति । अतः जनजाजातियसमाजः अन्येभ्यः समाजेभ्यः पृथक् भवति । एतेषाम् अन्येषां समाजानां विषये भवती अग्रे पठिष्यति ।

पुरुषैः क्रियमाणानां कार्याणां काञ्चित् सूचीं निर्मातु । महिलाः कानि कानि कार्याणि कुर्वन्ति ? कानि तादृशानि कार्याणि सन्ति यानि स्त्रीपुरुषाः मिलित्वा कुर्वन्ति ?

### सूक्ष्मनिरीक्षणम्

#### (क) मेहरगढे जीवन-मृत्यू

द्वितीये मानचित्रे चतुर्दशे पृष्ठे मेहरगढम् अन्वेषयतु । अयम् ईरानगमनार्थं यः महत्तमः मार्गः अस्ति तन्मध्ये बोलन इति स्थानस्य पार्श्वे कश्चित् हरितिमायुक्तं समतलं स्थानम् अस्ति । मेहरगढं सम्भवतः तत् स्थानम् अस्ति यत्र स्त्रीपुरुषाः आदौ यव-गोधूमयोः प्रोहणम् अपि च अजावीनां पालनं शिक्षितवन्तः ।

अत्र खनने सर्वादौ प्रारम्भिकेभ्यः स्तरेभ्यः पुरातत्त्वविदः विभिन्नप्रकारकाणां पशूनाम् अस्थीनि प्राप्तवन्तः । एतेषु हरिणसूकरसदृशानां वन्यप्राणिनाम् अस्थीनि अपि सम्मिलितानि सन्ति । पश्चात्जातेभ्यः स्तरेभ्यः अजावीनां च अस्थीनि आधिक्येन लब्धानि सन्ति । ततः परम् आधिक्येन पशूनाम् एव अस्थीनि लब्धानि सन्ति इत्थं प्रतिभाति यत् एते जनाः पशूनां पालनम् आरब्धवन्तः आसन् ।

ग्रामः
ग्रामाणाम् इयं विशेषता अस्ति यत् तत्र वास्तव्याः अधिकतराः जनाः भोजनस्य उत्पादने संलग्नाः भवन्ति ।

### पूर्वतनकालस्य पश्चात् जातस्य च कालस्य स्तराः

यदा पुरातत्त्वविदः कस्य स्थानस्य खननं कुर्वन्ति तदा ते कथम् अवगच्छन्ति यत् के स्तराः पूर्वतनीयाः सन्ति अपि च के स्तराः पश्चात्तनीयाः सन्ति ?

एतत् चित्रं पश्यतु ।

मन्यतां जनाः सर्वादौ समतलभूमौ (स्तरः- ४) वासम् आरब्धवन्तः । सामान्यतया जनाः यत्र निवसन्ति गृहे त्रुटिते सति तत्रैव पुनः गृहं निर्मान्ति । जीर्णानि शीर्णानि वस्तूनि अवकराः च अपि गृहाणां पार्श्वे सङ्गृहीताः भवन्ति । एतस्मात् कारणात् वासस्य भूमिः उन्नता भवति अपि च सहस्रस्य वर्षाणां पश्चात् तत्र कश्चित् उन्नतभूभागः (क्षुद्रपर्वतः) निर्मितः भवति । अतः यदा



तस्य क्षुद्रपर्वतः इत्यस्य खननं क्रियते तदा तस्य अधस्तनं स्थानं पुरातनतमं भवति तत्पश्चात् स्तरः पश्चात्जातानां युगानां भवन्ति । एतानि नतोन्नतानि तलानि एव सामान्यरूपेण स्तराणां रूपेण ज्ञायन्ते ।

द्वितीयं तृतीयं च स्तरं पश्यतु । एतयोः स्तरयोः कः पुरातनतरः अस्ति ?

मेहरगढे एतद् अतिरिच्य चतुराकाराणां तथा च आयताकार-गृहाणाम् अवशेषाः अपि प्राप्ताः सन्ति । प्रत्येकं गृहेषु चत्वारः अथवा ततोऽधिकाः प्रकोष्ठाः सन्ति, येषु केचन सम्भवतः भाण्डारणस्य कार्ये प्रयुक्ताः स्युः ।

मृत्योः पश्चात् तस्य परिजनाः तस्य सम्मानं कुर्वन्ति । जनानाम् आस्था वर्तते यत् मृत्योः पश्चात् अपि जीवनं भवति । अतः शवगर्त्तेषु मृतकैः सह कानिचन वस्तूनि अपि स्थाप्यन्ते स्म । मेहरगढे एतादृशाः बहवः शवगर्त्ताः लब्धाः सन्ति । एकस्मिन् प्रेतभूमौ मृतकेन सार्धं काचित् अजा अपि भूमिसात् कृता आसीत् । सम्भवतः इयं परलोके मृतकस्य जनस्य कृते भक्षणाय स्थापिता स्यात् ।



*मेहरगढस्थस्य गृहस्य चित्रम् ।*

मेहरगढस्य गृहाणि प्रायः एवं दृश्यमानानि स्युः । त्वं यस्मिन् गृहे निवससि तेन सह एतस्य गृहस्य का समानता अस्ति ?

मेहरगढस्थस्य प्रेतभूमेः चित्रम् ।

किं त्वम् अजायाः अस्थिपञ्जरं परिचेतुं शक्नोषि ?

### (ख) दाओजली-हेडिंगः

द्वितीये मानचित्रे (पृष्ठम्- १४) दोओजली-हेडिंगम् अन्वेषयतु। इदं पुरास्थलं चीनम्यांमारौ प्रति गमनशीले मार्गे ब्रह्मपुत्रस्य उपत्यकायाः कस्मिंश्चित् पर्वते अस्ति । अत्र खरल-मुसल-सदृशानां पाषाणानाम् उपकरणानि प्राप्तानि सन्ति । एतेभ्यः ज्ञायते यत् अत्र जनाः भोजनार्थं अन्नानि प्ररोहन्ति स्म। सहैव अत्र जेडाइटपाषाणः अपि अलभत । चीनदेशीयः स्यात् । एतत् अतिरिच्य



एतस्मात् पुरास्थलात् काष्ठाश्मनः (अतिप्राचीनं काष्ठं यत् दृढं भूत्वा पाषाणः इति जातम्) उपकरणानि पात्राणि च अपि उपलब्धानि सन्ति।

### अन्यत्र

मानचित्रे तुर्कीम् अन्वेषयतु । नवपाषाणयुगस्य सर्वप्रसिद्धपुरास्थलेषु कश्चित् चलात-ह्यूकः तुर्क्याम् अस्ति । अत्र दूरस्थेभ्यः स्थानेभ्यः अनेकानि वस्तूनि आनीयन्ते स्म अपि च तेषाम् उपयोगः क्रियते स्म । यथा सीरियातः आनीतः चकमकपाषाणः, रक्तसागरस्य कौडियाँ इति, भूमध्यसागरस्य च सीपियाँ इति । ध्यातव्यं यत् तत्कालं यावत् चक्र-युक्तस्य वाहनस्य आविष्कारः विकासः वा न अभवत् आसीत् । जनाः वस्तूनि स्वयं स्वस्कन्धयोः पशूनां च पृष्ठभागेषु स्थापयित्वा आरोहयित्वा च नयन्ति स्म ।

बोधयतु यत् कौडियाँ सीपियाँ इत्येतेषां च प्रयोगः किमर्थं जातं स्यात् ?

## कल्पनां करोतु

यदि भवत्याः पार्श्वे कश्चित् भूखण्डः भवेत् तदा भवती तस्मिन् किं सस्यं प्ररोहिष्यति। बीजानि कुतः लप्स्यन्ते ? अपि च तानि कथम् उप्स्यति ? स्वपादपानां निरीक्षणं भवती कथं करिष्यति ? अपि च कथम् इदं ज्ञास्यति यत् अधुना सस्यं कर्तनीयम् अस्ति न वा ?

उपयोगि-शब्दाः
कृषकः,
पशुपालकः,
नवपाषाणयुगम्,
पात्रम्,
जनजातिः,
ग्रामः,
गृहम्,
प्रेतभूमिः

**काञ्चन महत्त्वपूर्णतिथय:**

- वासस्य प्रक्रियाया: आरम्भ: (प्राय: १२००० वर्षेभ्य:प्राक्)
- मेहरगढे वासस्थानकस्य आरम्भ:(प्राय: ८००० वर्षेभ्य: प्राक्)

## आगच्छन्तु स्मरणं कुर्म:



१. कृषका: चिरकालं यावत् एकस्मिन् एव स्थाने किमर्थं निवसन्ति स्म ?

२. पञ्चविंशतितमे पृष्ठे प्रदत्तां तालिकां पश्यतु । नेइनुओ यदि ओदनं बुभुक्षति तर्हि तया कानि स्थानानि गन्तव्यानि ?

३. पुरातत्त्वविद: इत्थं किमर्थं मन्यन्ते यत् मेहरगढस्य जना: आदौ केवलं मांसभक्षिण: आसन्, अपि च अनन्तरकाले तेषां कृते पशुपालनं महत्त्वपूर्णं जातम् ?

४. उचितम् अथवा अनुचितं ज्ञापयतु ।

(क) हल्लूरे प्रियङ्गु: लब्ध: अस्ति ।

(ख) बुर्जहोमे जना: आयताकारगृहेषु निवसन्ति स्म ।

(ग) चिरांद: काश्मीरस्य कश्चित् पुरास्थलम् अस्ति ।

(घ) जेडाइट: य: दाओजलीहेंडिगे प्राप्त: अस्ति, चीनत: आनीत: स्यात् ।

## आगच्छन्तु चर्चां कुर्म:



५. कृषक-पशुपालकानां जीवनस्य अपेक्षया आखेटक-खाद्य-सङ्ग्राहकानां जीवनं कियत् भिन्नम् आसीत्, अन्तरत्रयं ज्ञापयतु ।

६. २५तमे पृष्ठे प्रदत्ततालिकायां पशूनां सूचीं कुर्वन्तु अपि इदम् अपि ज्ञापयतु यत् एतेषां प्रयोग: केन रूपेण क्रियते स्म ।

## आगच्छन्तु कृत्वा पश्याम:



७. भवती यानि अन्नानि खादति तेषां सूचीं निर्मातु ।

८. सप्तमस्य प्रश्नस्य उत्तरे लिखितान्नानि किं भवन्त: स्वयं प्रोहयन्ति ? यदि आम्, तर्हि काञ्चित् तालिकां निर्माय तेषां कृषे: विभिन्नावस्था: दर्शयन्तु । यदि नैव, तर्हि काञ्चित् तालिकां निर्माय दर्शयन्तु यत् एतानि अन्नानि कृषकाद् आरभ्य भवत्पर्यन्तं कथम् आगतानि ।

इति तृतीयोऽध्याय: